# shrIsarasvatIgItA

# શ્રીસરસ્વતીગીતા

## Document Information

Text title : sarasavatIgItA

File name : sarasavatIgiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Sunder Hattangadi sunder at hotmail.com

Proofread by : Sunder Hattangadi sunder at hotmail.com

Description-comments : from Panchadasha Gita published by Khemraj 1896.

Latest update : December 15, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીસરસ્વતીગીતા

॥ અથ સરસ્વતીગીતા ॥

માર્કણ્ડેય ઉવાચ -
અત્રૈવ ચ સરસ્વત્યા ગીતં પરપુરઞ્જય ।
પૃષ્ટા યા મુનિના વીર શ‍ृણુ તાર્ક્ષ્યેણ ધીમતા ॥ ૧॥

તાર્ક્ષ્ય ઉવાચ -
કિનુ શ્રેયઃ પુરુષસ્યેહ ભદ્રે કથં કુર્વન્ન ચ્યવતે સ્વધર્માત્ ।
આચક્ષ્વ મે ચારુસર્વાંગિ કુર્યાત્વયાશિષ્ટો ન ચ્યવેયં સ્વધર્માત્ ॥ ૨॥

કથં વાગ્નિં જુહુયાં પૂજયે વા કસ્મિન્કાલે કેન ધર્મો ન નશ્યેત્ ।
એતત્સર્વ સુભગે પ્રબ્રવીહિ યથા લોકાન્ વિરજાઃ સંચરેયમ્ ॥ ૩॥

માર્કણ્ડેય ઉવાચ -
એવં પૃષ્ટા પ્રીતિયુક્તેન તેન શુશ્રૂમીક્ષ્યોત્તમબુદ્ધિયુક્તમ્ ।
તાર્ક્ષ્યં વિપ્રં ધર્મયુક્તં હિતં ચ સરસ્વતી વાક્યમિદં બભાષે ॥ ૪॥

સરસ્વત્યુવાચ -
યો બ્રહ્મ જાનાતિ યથાપ્રદેશં સ્વાધ્યાયનિત્યઃ સુચિરપ્રમત્તઃ ।
સ વૈ પારં દેવલોકસ્ય ગન્તા સહામરૈઃ પ્રાપ્નુયાત્પ્રીતિયોગમ્ ॥ ૫॥

તત્ર સ્મ રમ્યાવિપુલા વિશોકાઃ સુપુષ્પિતાઃ પુષ્કરિણ્યઃ સુપુણ્યાઃ ।
અકર્દમામીનવત્યઃ સુતીર્થા હિરણ્મયૈરાવૃતાઃ પુણ્ડરીકૈઃ ॥ ૬॥

તાસાં તીરેષ્વાસતે પુણ્યભાજો મહીયમાનાઃ પૃથગપ્સરોભિઃ ।
સુપુણ્યગન્ધાભિરલંકૃતાભિર્હિરણ્યવર્ણાભિરતીવ દૃષ્ટાઃ ॥ ૭॥

પરં લોકં ગોપ્રદાસ્ત્વાપ્નુવન્તિ દત્વાનડુહં સૂર્યલોકં વ્રજન્તિ ।
વાસો દત્વા ચાન્દ્રમસં તુ લોકં દત્વા હિરણ્યમમરત્વમેતિ ॥ ૮॥

ધેનું દત્વા સુપ્રભાં સુપ્રદોહાં કલ્યાણવત્સામપલાયિનીં ચ ।

યાવન્તિ રોમાણિ ભવન્તિ તસ્યાસ્તાવદ્વર્ષાણ્યાસતે દેવલોકે ॥ ૯॥

અનડ્વાહં સુવ્રતં યો દદાતિ હલસ્ય વોઢારમનન્તવીર્યમ્ ।
ધુરન્ધરં બલવન્તં યુવાનં પ્રાપ્નોતિ લોકાન્દશધેનુદસ્ય ॥ ૧૦॥

દદાતિ યો વૈ કપિલાં સચૈલાં કાંસ્યોપદોહાં દ્રવિણૈરુત્તરીયૈ ।
તૈસ્તૈર્ગુણૈઃ કામદુહાથ ભૂત્વા નરં પ્રદાતારમુપૈતિ સા ગૌઃ ॥ ૧૧॥

યાવન્તિ રોમાણિ ભવન્તિ ધેન્વાસ્તાવત્ફલં ભવતિ ગોપ્રદાને ।
પુત્રાંશ્ચ પૌત્રાંશ્ચ કુલં ચ સર્વમાસપ્તમં તારયતે પરત્ર ॥ ૧૨॥

સદક્ષિણાં કાંચનચારુશ‍ૃઙ્ગીં કાંસ્યોપદોહાં દ્રવિણૈરુત્તરીયૈઃ ।
ધેનું તિલાનાં દદતો દ્વિજાય લોકા વસૂનાં સુલભા ભવન્તિ ॥ ૧૩॥

સ્વકર્મભિર્દાનવસંનિરુદ્ધે તીવ્રાન્ધકારે નરકે પતન્તમ્ ।
મહાર્ણવે નૌરિવ વાતયુક્તા દાનં ગવાં તારયતે પરત્ર ॥ ૧૪॥

યો બ્રાહ્મદેયાં તુ દદાતિ કન્યાં ભૂમિપ્રદાનં ચ કરોતિ વિપ્રે ।
દદાતિ દાનં વિધિના ચ યશ્ચ સ લોકમાપ્નોતિ પુરન્દરસ્ય ॥ ૧૫॥

યઃ સપ્તવર્ષાણિ જુહોતિ તાર્ક્ષ્ય હવ્યં ત્વગ્નૌ નિયતઃ સાધુશીલ ।
સપ્તાવરાન્સપ્તપૂર્વાન્પુનાતિ પિતામહાનાત્મના કર્મભિઃ સ્વૈઃ ॥ ૧૬॥

તાર્ક્ષ્ય ઉવાચ -
કિમગ્નિહોત્રસ્ય વ્રતં પુરાણમાચક્ષ્વ મે પૃચ્છતશ્ચાનુરૂપે ।
ત્વયાનુશિષ્ટોહમિહાદ્ય વિદ્યાં યદગ્નિહોત્રસ્ય વ્રતં પુરાણમ્ ॥ ૧૭॥

સરસ્વતી ઉવાચ -
ન વાશુચિર્નાપ્યનિર્ણિક્ત્ય પાણિર્નાબ્રહ્મવિજ્જુહુયાન્નાવિપશ્ચિત્ ।
બુભુત્સવઃ શુચિકામા હિ દેવા નાશ્રદ્દધાનાદ્ધિહવિર્જુહન્તિ ॥ ૧૮॥

નાશ્રોત્રિયં દેવહવ્યે નિયુંજ્યાન્મોઘં પુરા સિંચતિ તાદૃશો હિ ।
અપૂર્વમશ્રોત્રિયમાહ તાર્ક્ષ્ય ન વૈ તાદૃગ્જુહુયાદગ્નિહોત્રમ્ ॥ ૧૯॥

કૃશાશ્ચ યે જુહ્વતિ શ્રદ્દધાનાઃ સત્યવ્રતા હુતશિષ્ટાશિનશ્ચ ।
ગવાં લોકં પ્રાપ્ય તે પુણ્યગન્ધં પશ્યન્તિ દેવં પરમં ચાપિ સત્યમ્ ॥ ૨૦॥

તાર્ક્ષ્ય ઉવાચ -
ક્ષેત્રજ્ઞભૂતાં પરલોકભાવે કર્મોદયે બુદ્ધિમતિ પ્રવિષ્ટામ્ ।
પ્રજ્ઞાં ચ દેવીં સુભગે વિમૃશ્ય પૃચ્છામિ ત્વાં કાહ્યસિ ચારુરૂપે ॥ ૨૧॥

સરસ્વત્યુવાચ -
અગ્નિહોત્રાદહમભ્યાગતાસ્મિ વિસર્પમાણા સંશયચ્છેદનાય ।
ત્વત્સન્નિયોગાદહમેતદબ્રુબં ભાવે સ્થિતા તથ્યમર્થં યથાવત્ ॥ ૨૨ ॥

તાર્ક્ષ્ય ઉવાચ -
ન હિ ત્વયા સદૃશી કાચિદસ્તિ વિભ્રાજસે હ્યતિમાત્રં યથા શ્રીઃ ।
રૂપં ચ તે દિવ્યમનન્તકાન્તિ પ્રજ્ઞાં ચ દેવીં સુભગે બિભર્ષિ ॥ ૨૩ ॥

સરસ્વત્યુવાચ -
શ્રેષ્ઠાનિ યાનિ દ્વિપદાં વરિષ્ઠ યજ્ઞેષુ વિદ્વન્નુપપાદયન્તિ ।
તૈરેવ ચાહં સમ્પ્રવૃદ્ધા ભવામિ ચાપ્યાયિતા રૂપવતી ચ વિપ્ર ॥ ૨૪ ॥

યચ્ચાપિ દ્રવ્યમુપયુજ્યતેહ વાનસ્પત્યમાયસમ્પાર્થિવં વા ।
દિવ્યેન રૂપેણ ચ પ્રજ્ઞયા ચ તવૈવ સિદ્ધિરિતિ વિદ્ધિ વિદ્વન્ ॥ ૨૫ ॥

તાર્ક્ષ્ય ઉવાચ -
ઇદં શ્રેયઃ પરમં મન્યમાના વ્યાપૃચ્છન્તે મુનયઃ સમ્પ્રતીતાઃ ।
આચક્ષ્વ મે તં પરમં વિશોકં મોક્ષં પરં યં પ્રવિશન્તિ ધીરાઃ ।
સાંખ્યં યોગાઃ પરમં યં વિદન્તિ પરં પુરાણં તમહં ન વેદ્મિ ॥ ૨૬ ॥

સરસ્વત્યુવાચ -
તં વૈ પરં વેદવિદઃ પ્રપન્નાઃ પરં પરેભ્યઃ પ્રથિતં પુરાણમ્ ।
સ્વાધ્યાયવન્તો વ્રતપુણ્યયોગૈસ્તપોધના વીતશોકા વિમુક્તાઃ ॥ ૨૭ ॥

તસ્યાથ મધ્યે ચેતસઃ પુણ્યગન્ધાઃ સહસ્ર શાખા વિપુલા વિભાન્તિ ।
તસ્ય મૂલાત્સરિતઃ પ્રસ્રવન્તિ મધૂદકપ્રસ્રવણાઃ સુપુણ્યાઃ ॥ ૨૮ ॥

શાખાં શાખાં મહાનદ્યઃ સંયાન્તિ સિકતાશયાઃ ।
ધાનાઃ પૂપા માંસશાકા સદા પાયસકર્દમાઃ ॥ ૨૯ ॥

યસ્મિન્નગ્નિમુખા દેવાઃ સેન્દ્રાઃ સહમરુદ્ગણાઃ ।
ઈજિરે ક્રતુભિઃ શ્રેષ્ઠૈસ્તત્પદં પરમં મમ ॥ ૩૦ ॥

ઇતિ સરસ્વતીગીતા સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*shrIsarasvatIgItA*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*